तुम्बिनी ७ कटुतुम्बिनी ८ बृहत्फला ९ राजपुत्री १० तिक्तबीजा ११ तुम्बिका १२ ॥ अस्या गुणाः । कटुत्वम् । तीक्ष्णत्वम् । वान्तिकारित्वम् । श्वासवातकासशोथव्रणशूकविषनाशित्वम् । शोधनत्वञ्च । इति राजनिर्घण्टः ॥ पाण्डुकृमिकफवार्य्यनाशित्वम् । लघुपाकित्वञ्च । इति राजवल्लभः ॥ ("कटुतुम्बी हिमा हृद्या पित्तकासविषापहा । तिक्ता कटुर्विपाके च वातपित्तज्वरान्तकृत्" ॥)

कटुत्रयं, क्ली, (कटूनां कटुरसानां त्रयम् ।) त्रिकटु । इति राजनिर्घण्टः ॥ (अस्य गुणाः । "त्र्यं त्रिकटुकं जयेत् । स्थौल्याग्नि-सदन-श्वास-कास-श्लीपद-पीनसान्" ॥ इति वाभटः ॥)

कटुदला, स्त्री, (कटु दलं पत्रं यस्याः ।) कर्कटी । इति राजनिर्घण्टः । काँकुड़ इति भाषा ॥

कटुनिष्पावः पुं, (कटुश्चासौ निष्पावश्चेति ।) नदीनिष्पावधान्यम् । इति राजनिर्घण्टः ॥

कटुपत्रः, पुं, (कटु तीव्रं पत्रं यस्य ।) पर्पटः । सितार्जकः । इति राजनिर्घण्टः ॥

कटुपत्रिका, स्त्री, (कटु पत्रं यस्याः । ततः कप् । अत इत्वं टाप् च ।) कारीवृक्षः । इति राजनिर्घण्टः ॥

कटुफलः, पुं, (कटु फलं यस्य । अस्य पत्रस्यतिक्तत्वेपि फले कटुपाकत्वात् ।) पटोलः । इति राजनिर्घण्टः ॥

कटुफला, स्त्री, (कटु फलं यस्याः ।) श्रीवल्लीवृक्षः । इति राजनिर्घण्टः ॥

कटुभङ्गः, पुं, (कटुः एकैकदेशभङ्गश्च यस्य ।) शुण्ठी । इति त्रिकाण्डशेषः ॥

कटुभद्रं क्ली, (कट्वपि भद्रं सेवनेन हितजनकम् ।) शुण्ठी । इति राजनिर्घण्टः ॥ आर्द्रकम् । इति केचित् ।

कटुमञ्जरिका, स्त्री, (कटुः तीक्ष्णा मञ्जरी अस्ति अस्याः । अच् गौरादित्वात् ङीष् संज्ञायां कन् टाप् पूर्व्वह्रस्वत्वञ्च ।) अपामार्गः । इति राजनिर्घण्टः ॥

कटुमोदं, क्ली, (कटुरेव मोदः गन्धो यस्य तत् ।) जवादिनामसुगन्धिद्रव्यम् । इति राजनिर्घण्टः ॥

कटुरं, क्ली, (कटति मन्थनेन रसान्तरं गुणान्तरं वा वर्षतीति । कट + उरन् । यद्वा कथ्यते प्रकथ्यते मन्थनात् रसान्तरेण गुणान्तरेण च प्रकाश्यते इति ।) तक्रम् । इति जटाधरः ॥ कट्वरं इत्यपि पाठः ॥

कटुरवः, पुं, (कटुः कर्कशो रवः ध्वनिर्यस्य ।) मण्डूकः । इति राजनिर्घण्टः ॥

कटुरोहिणी, स्त्री, (कटुश्चासौ कट्वी चासौ वा रोहिणी चेति । केचित्तु कटुः सती रोहतीति + रुह + णिनिः ततो ङीप् ।) कटुकी । इत्यमरः । २ । ४ । ४५ ॥

कटुवार्त्ताकी, स्त्री, (कटुः कट्वी वार्त्ताकी ।) श्वेतकण्टकारी । इति राजनिर्घण्टः ॥

कटुवीजा, स्त्री, (कटु वीजं यस्याः ।) पिप्पली । इति राजनिर्घण्टः ॥

कटुशृङ्गालं क्ली, (कटूनां शृङ्गाय प्राधान्याय अलति पर्य्याप्नोतीति । अल + अच् ।) गौरसुवर्णशाकम् । इति राजनिर्घण्टः ॥

कटुस्नेहः, पुं, (कटुः तीक्ष्णः स्नेहः रसविशेषो यस्य ।) सर्षपः । इति त्रिकाण्डशेषः ॥ गौरसर्षपः । इति राजनिर्घण्टः ॥

कटूत्कटं, क्ली, (कटुषु उत्कटम् ।) आर्द्रकम् । इति रत्नमाला ॥

कटूत्कटकं, क्ली, (कटुषु उत्कटम् । ततः संज्ञायां कन् ।) शुण्ठी । इति राजनिर्घण्टः ॥

कटोरं, क्ली, (कथ्यते वृष्यते निषिच्यते वा भक्ष्यद्रव्यं यत्र । कट + अधिकरणे ओलच् । रलयोरैक्यात् लस्य रत्वम् ।) पात्रविशेषः । कटोरा इति भाषा । यथा,—मेरुतन्त्रे पञ्चमप्रकाशः ॥ * ॥

"मृत्कर्पटे संयुतकाचकूप्यां
दत्त्वा मुखं लोहपलोहसूत्रैः ।
निष्कासितो धूमरसस्तु तस्य
सौगन्धिकैः काचकटोरके यः" ॥

किञ्च ।

"रम्यान्नं देवकीदत्तं पात्रे काञ्चननिर्म्मिते ।
कटोराणां चतुःषष्टिः पात्रस्योभयतः स्थिता" ।
इति जैमिनिभारते आश्वमेधिके पर्व्वणि ९ अध्यायः ॥

कटोरा, स्त्री, (कथ्यते वृष्यते दीयते स्थाप्यते वा भक्ष्यद्रव्यादिकमस्याम् । कट + ओलच् । लस्य रत्वम् ।) स्वनामख्यातपात्रम् । इति ब्रह्मवैवर्त्तपुराणम् । वाटि इति भाषा ॥

कटोलः, पुं, (कटति सदाचारं मिष्टाद्यन्नरसञ्च आवृणोतीति । "कपिगतिगण्डिकटिपटिभ्य ओलच्" । उणां १ । ६७ । इति ओलच् ।) चण्डालः । इत्युणादिकोषः ॥ कटुरसः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

कटोलवीणा, स्त्री, (कटोलस्य चाण्डालस्य वीणा वाद्ययन्त्रविशेषः ।) वीणाविशेषः । इति शब्दरत्नावली । केन्दुड़ा इति ख्याता ॥

कट्फलः, पुं, (कटति कटुतया अन्यरसमावृणोतीति । कट् + क्विप् । कट् फलं यस्य सः ।) स्वनामख्यातफलवृक्षविशेषः । कायफल इति भाषा । तत्पर्य्यायः । श्रीपर्णिका २ कुमुदिका ३ कुम्भी ४ कैटर्य्यः ५ । इत्यमरः २ । ४ । ४० ॥ सोमवल्कः ६ सोमवृक्षः ७ रोहिणी ८ । इति रत्नमाला ॥ कृष्णगर्भः ९ प्रचेतसी १० भद्रावती ११ महाकुम्भी १२ रामसेनकः १३ कुमुदा १४ उग्रगन्धः १५ भद्रा १६ रञ्जनकः १७ लघुकाश्मर्य्यः १८ श्रीपर्णी १९ कापफलः २० परुषः २१ कुमुदी २२ । इति शब्दरत्नावली ॥ अपि च ।

"कट्फलः सोमवल्कश्च कैटर्य्यः कुम्भिकापि च ।
श्रीपर्णिका कुमुदिका भद्रा भद्रवतीति च ॥
कट्फलस्तुवरस्तिक्तः कटुर्व्वातकफज्वरान् ।
हन्ति श्वासप्रमेहार्शःकासकण्ठामयारुचीः" ॥

इति भावप्रकाशः ॥ अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कासश्वासज्वरोपदाहनाशित्वम् । रुचिकारित्वम् । मुखरोगशमप्रदत्वञ्च । इति राजनिर्घण्टः ॥ कफरोगनाशित्वम् । इति राजवल्लभः ॥ ("कट्फलः कफरोगघ्नः कासश्वासज्वरापहः" ॥ इति वैद्यकद्रव्यगुणाः ॥)

कट्फला, स्त्री, (कटति इति । कट् + क्विप् तदेव फलमस्याः ।) गम्भारीवृक्षः । इति रत्नमाला ॥ वृहती । काकमाची । देवदाली । वार्त्ताकी । मृगेर्व्वारुः । इति राजनिर्घण्टः ॥

कट्वङ्गः, पुं, (कटु अङ्गमस्य ।) श्योनाकवृक्षः । इत्यमरः । २।४।५६ ॥ कटूनि उग्राणि वीर्य्यव्यञ्जकानि अङ्गानि यस्य ।) दिलीपराजः । इति त्रिकाण्डशेषः ॥

कट्वरं, क्ली, (कटति वर्षति रसान्तरम् । "छित्वरच्छत्वरधीवरपीवरमीवरचीवरतीवरनीवरगह्वरकट्वरसंयद्वराः" उणां ३ । १ । इति कट् + ष्वरच् । निपातनात् साधु ।) दधिसरः । इति रत्नमाला ॥ व्यञ्जनम् । इत्युणादिकोषः ॥ तक्रम् । यथा ।

"दध्नः ससारकस्यात्र तक्रं कट्वरमुच्यते" ।
इति चक्रपाणिकृतसंग्रहे ॥

("सुवर्च्चिका-नागर-कुष्ठ-मूर्व्वा
लाक्षा-निशा-लोहितयष्टिकाभिः ।
तैलं ज्वरे षड्गुणतक्रसिद्ध-
मभ्यञ्जनाच्छीतविदाहनुत् स्यात्" ॥
इति षट्कट्वरं तैलम् ॥)

कट्वी, स्त्री, (कथ्यते कटुरसतया खाद्यते अनुभूयते वा । कट् + उन् । ततः स्त्रियां ङीप् । वोतो गुणवचनादिति ङीष् वा । पां । ४ । १ । ४४ ।) कटुका । लताविशेषः । तत्पर्य्यायः । कटुकवल्ली २ सुकाष्ठा ३ काष्ठवल्लिका ४ सुवल्ली ५ महावल्ली ६ पशुमोहनिका ७ कटुः ८ ॥ अस्या गुणाः । मधुरत्वम् । शीतत्वम् । कफश्वासनानाज्वरहारित्वम् । रुचिकारित्वम् । राजयक्ष्मनिवारणत्वञ्च । इति राजनिर्घण्टः ॥ (कटुकाशब्देऽस्या गुणादयो व्याख्याताः ॥)

कठ इ कि आध्याने । उत्कण्ठापूर्व्वकस्मरणे इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भ्वां-परं-सकं-सेट्-इदित् ।) इ कर्म्मणि कण्ठ्यते । कि कण्ठयति । आध्यानं स्म्ऱ म औत्क्ये इत्यत्र व्याख्यातम् । इति दुर्गादासः ॥

कठ तङ्गने । तङ्गनं दुःखेन जीवनम् । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) कठति दीनः । इति दुर्गादासः ॥

कठ इ ङ आध्याने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट्-इदित् ।) इ कर्म्मणि कण्ठ्यते । ङ कर्त्तरि कण्ठते । "रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते" । इति दुर्गादासः ॥

कठः, पुं, (कठेन प्रोक्तमधीते यः । कठशाखां अभिजानाति वा "कठचरकात् लुक्" । इति लुक् । ४।३।१०७ ।) मुनिविशेषः । कठशाखाध्ययनकर्त्ता कठशाखाज्ञः । (यथा महाभारते । १ । पौलमे ८ । २४ ।

"उद्दालकः कठश्चैव श्वेतश्चैव महायशाः" ॥

स्वरभेदः । स्वरः ।

("कठो मुनौ तदाख्यातवेदाध्येतृद्वयोः स्वरे" ।)

इति हेमचन्द्रः ॥ ब्राह्मणः । इति त्रिकाण्डशेषः ॥ (उपनिषद्विशेषः । यदुक्तं मुक्तिकोपनिषदि ।